**बालुक** न॰ बालु+स्वार्थे क । १तत्रैव अमरः । चु॰ बाल–उक । २पानीयामलके पु॰ राजनि॰ । ३सिकतासु स्त्री । ४कर्कट्यां जटा॰ ५कर्पूरे ६यन्त्रभेदे शब्दच॰ ।

**बालुकायन्त्र** न॰ ६त॰ । १औषधपाकार्थे यन्त्रभेदे । "भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके । कूपिका कण्ठपर्य्यन्तं बालुकाभिश्च पूरिते । भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते । बालुकायन्त्रमेतद्धि यन्त्रतन्त्रबुधैः स्मृतम्" भावप्र॰ । २कालज्ञापने रघुना॰ प्रदर्शिते यन्त्रभेदे "सच्छत्ररेणुगर्भैश्च सम्यक् कालं प्रसाधयेत्" स्मृ॰ सि॰ व्याख्यायां "स्थलाकारेण रेणवः सिकतांशागर्भे उदरे यस्यैतादृशं यन्त्रं बालुकायन्त्रं प्रसिद्धम्" रघुनाथः ।

**बालुकास्वेद** पु॰ ३त॰ । भावप्र॰ उक्ते तप्तबालुकाभिः स्वेदने । "वातश्लेष्मकृते स्वेदान् कारयेद्रूक्षनिर्मितान् । स्निग्धः स्वेदो निषिद्धोऽत्र विना केवलवातजान् । खर्परभ्रष्टपटस्थितकाञ्जिकसंसिक्तबालुकास्वेदः । शमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन् । स्रोतसां मार्दवं कृत्वा नीत्वा पावकमाशयम् । हृत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति" । [पृषो॰ नुक् । बालुङ्कीत्यप्यत्र त्रिका॰

**बालुकी** स्त्री॰ चु॰ बल-उक गौरा॰ ङीष् । कर्कटीभेदे राजनि॰

**बालूक** पु॰ चु॰ बाल–ऊक । विषभेदे हेमच॰ ।

**बालेय** पु॰ बलेरपत्यं, बलये हितं वा ढक् । १रासभे, अमरः २दैत्यभेदे, धरणिः ३अङ्गारवल्लर्य्यां विश्वः । ४चाणक्यमूलके पु॰ ५बालहिते च त्रि॰ मेदि॰ । [अमरः ।

**बालेयशाक** पु॰ बलये हितं ढक् कर्म॰ (वामनहाटि) शाकभेदे

**बालेष्ट** पु॰ बालानामिष्टः १ब(व)दरे राजनि॰ । २बालकानामभीष्टे त्रि॰ ।

**बालोपवीत** न॰ ६त॰ उरस्कटे बालयज्ञोपवीतशब्दार्थे हारा॰

**बाल्वजभारिक** त्रि॰ बल्वजानां भारं वहति वंशा॰ ठक् । उलपतृणभारवाहके ।

**बाल्य** न॰ बालस्य भावः, कर्म वा वयोवचनत्वात् ष्यञ् । 'आ षोड़शाद्भवेद्बाल' इत्युक्ते अवस्थाभेदे ।

**बाल्हक** न॰ बल्हिदेशे भवः बा॰ वुञ् । कुङ्कुमे अमरः पाठान्तरम् । [हिङ्गुनि न॰ ।

**बाल्हायन** त्रि॰ बल्हौ जातम् फक् । १बल्हिदेशोद्भवे

**बाल्हि(ही)क** पु॰ बल्हि+स्वार्थे ठञ् । ईक वा १कुङ्कुमे हिङ्गुनि च न॰ मेदि॰ ३देशभेदे ४तद्देशीये च पु॰ मेदि॰ । ५तद्देशस्थे हरिवं॰ ६ अ॰ । दीर्घमध्यः गन्धर्वभेदे पु॰ शब्दर॰

**बाष्कल** पु॰ ऋषिभेदे आश्व॰ गृ॰ ३।४।४ ।

**बाष्प(स्प)** पु॰ बाध-पृषो॰ सत्वं षत्वं वा । १नेत्रजले, २ऊष्मणि च अमरः लौहे च मेदि॰ तत्र अयमन्त्यस्थवादितयोक्तः ।

**बास्कल** पु॰ दैत्यभेदे हरिवं॰ ४अ॰ ।

**बा(बा)ह** प्रयत्ने भ्वादि॰ आत्म॰ अक॰ सेट् । बा(वा)हते अबा(वा)हिष्ट । ऋदित् चङि न ह्रस्वः अबबाहत् त ।

**बाह** पुंस्त्री बाहु+पृषो॰ । बाहुशब्दार्थे रमानाथः ।

**बाहा(हू)बाहवि** अव्य॰ बाहुभ्यां बाहुभ्यां प्रहृत्य प्रवृत्तम् युद्धम् इच्समा॰ पूर्वपदे आत् दीर्घो वा । बाहुभ्यां बाहुभ्यां प्रहृत्य प्रवृत्ते युद्धे । [अमरः ।

**बाहु** पु॰ बाध-कु धस्य हः । भुजे कक्षावध्यङ्गुलिपर्य्यन्तेऽवयवे

**बाहुक** पु॰ ऋतुपर्णनृपस्य अश्वपालत्वादिरूपेण स्थिते नलनृपे तत्कथा भा॰ व॰ ६७अ॰ दृश्या । २नागभेदे भा॰ आ॰ ५७ अ॰ ।

**बाहुकुण्ठ** त्रि॰ ३त॰ । कुण्ठितबाहुके (कोपा) जटा॰ ।

**बाहुकुन्थ** पु॰ बाहुरिव कुन्थति कुन्थ–अच् । विहगानां बाहुस्थानीये पक्षे शब्दच॰ । [जाते ।

**बाहुकुलेयक** त्रि॰ बहुकुले जातादि ढकञ् । बहुकुल-

**बाहुज** पु॰ बाहुभ्यां व्र(ब्र)ह्मबाहुभ्यां जायते जन-ड । १क्षत्रिये अमरः । 'बाहू राजन्यावि'ति श्रुतिः । २कीरे ३स्वयं जाततिले च मेदि॰ ४बाहुजातमात्रे त्रि॰ ।

**बाहुत्र** पु॰ न॰ बाहुं त्रायते त्रै-क । अस्त्राघातवारणार्थं हस्तबद्धे लौहवर्मादौ हेमच॰ ।

**बाहुत्राण** न॰ बाहू त्रायते अनेन त्रै–करणे ल्युट् । शस्त्राघात वारणार्थं बाहुबद्धवर्मणि हेमच॰ ।

**बाहुदन्तक** पु॰ बहवश्चत्वारो दन्ता अस्य कप् ऐरावतः उपचारात् इन्द्रः तेन प्रोक्तमण् । पुरन्दरप्रोक्ते पञ्चसहस्रात्मके नीतिशास्त्रभेदे भा॰ शा॰ ५९अ॰ । [इन्द्रे हेमच॰ ।

**बाहुदन्तेय** पु॰ बहुदन्तश्चतुर्दन्त ऐरावतस्तमर्हति वा॰ ढ ।

**बाहुदा** स्त्री स्वनामख्याते १नदीभेदे । सा च प्रसेनजिज्जायां गौरी नाम, भर्त्रा शप्ता नदीरूपा जाता हरिवं॰ १२अ॰ । सा हि शङ्खस्य भ्रातुः फलहरणे द्युम्नन्टपदण्डेन छिन्नं लिखितस्य मुनेः हस्तम् अवगाहनात् पुनर्ददाविति कथा भा॰ शा॰ २३ अ॰ यथा "स गत्वा बाहुदां शीघ्रं तर्पयस्व यथाविधि । देवानृषीन् पितृंश्चैव मा चाधर्मे मनः कृथाः । तस्य तद्वचनं श्रुत्वा शङ्खस्य लिखितस्तदा । अवगाह्यापगां पुण्यामुदकार्थं प्रचक्रमे । प्रादुरास्तां ततस्तस्य करौ जलजसन्निभौ । ततः स विस्मितो भ्रातुर्दर्शयामास तौ करौ" ।